श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ चतुरधिकशततमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुरधिकशततमः सर्गः ॥

**श्रीरामं प्रति कालेन ब्रह्मणः सन्देशस्य कथनं श्रीरामेण तस्याङ्गीकरणं च**

शृणु राजन् महासत्त्व यदर्थमहमागतः।
पितामहेन देवेन प्रेषितोऽस्मि महाबल ॥ **7.104.1** ॥

तवाहं पूर्वके भावे पुत्रः परपुरञ्जय।
मायासम्भावितो वीर कालः सर्वसमाहरः ॥ **7.104.2** ॥

पितामहश्च भगवानाह लोकपतिः प्रभुः।
समयस्ते कृतः सौम्य लोकान् सम्परिरक्षितुम् ॥ **7.104.3** ॥

सङ्क्षिप्य हि पुरा लोकान् मायया स्वयमेव हि।
महार्णवे शयानोऽप्सु मां त्वं पूर्वमजीजनः ॥ **7.104.4** ॥

भोगवन्तं ततो नागमनन्तमुदकेशयम्।
मायया जनयित्वा त्वं द्वौ च सत्त्वौ महाबलौ ॥ **7.104.5** ॥

मधुं च कैटभं चैव ययोरस्थिचयैर्वृता।
इयं पर्वतसम्बाधा मेदिनी चाभवत् तदा ॥ **7.104.6** ॥

पद्मे दिव्येऽर्कसङ्काशे नाभ्यामुत्पाद्य मामपि।
प्राजापत्यं त्वया कर्म मयि सर्वं निवेशितम् ॥ **7.104.7** ॥

सोऽहं सन्न्यस्तभारो हि त्वामुपासे जगत्पतिम्।
रक्षां विधत्स्व भूतेषु मम तेजस्करो भवान्॥ **7.104.8** ॥

ततस्त्वमसि दुर्धर्षात् तस्माद् भावात् सनातनात्।
रक्षां विधास्यन् भूतानां विष्णुत्वमुपजग्मिवान्॥ **7.104.9** ॥

अदित्यां वीर्यवान् पुत्रो भ्रातॄणां वीर्यवर्धनः।
समुत्पन्नेषु कृत्येषु तेषां साह्याय कल्पसे॥ **7.104.10** ॥

स त्वमुज्जास्यमानासु प्रजासु जगतां वर।
रावणस्य वधाकाङ्क्षी मानुषेषु मनोऽदधाः॥ **7.104.11** ॥

दशवर्षसहस्राणि दशवर्षशतानि च।
कृत्वा वासस्य नियमं स्वयमेवात्मना पुरा॥ **7.104.12** ॥

स त्वं मनोमयः पुत्रः पूर्णायुर्मानुषेष्विह।
कालोऽयं ते नरश्रेष्ठ समीपमुपवर्तितुम्॥ **7.104.13** ॥

यदि भूयो महाराज प्रजा इच्छस्युपासितुम्।
वस वा वीर भद्रं ते एवमाह पितामहः॥ **7.104.14** ॥

अथ वा विजिगीषा ते सुरलोकाय राघव।
सनाथा विष्णुना देवा भवन्तु विगतज्वराः॥ **7.104.15** ॥

श्रुत्वा पितामहेनोक्तं वाक्यं कालसमीरितम्।
राघवः प्रहसन् वाक्यं सर्वसंहारमब्रवीत्॥ **7.104.16** ॥

श्रुत्वा मे देवदेवस्य वाक्यं परममद्भुतम्।
प्रीतिर्हि महती जाता तवागमनसम्भवा॥ **7.104.17** ॥

त्रयाणामपि लोकानां कार्यार्थं मम सम्भवः।
भद्रं तेऽस्तु गमिष्यामि यत एवाहमागतः॥ **7.104.18** ॥

हृद्गतो ह्यसि सम्प्राप्तो न मे तत्र विचारणा।
मया हि सर्वकृत्येषु देवानां वशवर्तिना।
स्थातव्यं सर्वसंहार यथा ह्याह पितामहः ॥ **7.104.19** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे चतुरधिकशततमः सर्गः ॥